© 2018 IJSRST | Volume 4 | Issue 7 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# प्रत्याहारसूत्राणां विहङ्गवीक्षणम्

**डाॅः सन्तोष माझी**

**व्याकरणविभागः,सहाध्यापकः,**

**राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः**



**शोधालेखसारः** – लघुना उपायेन प्रकृतिप्रत्ययविभागपूर्वकं साधुशब्दज्ञानं व्याकरणाध्ययनस्य परमं प्रयोजनमिति सुविदितं वेदितव्यम्। स च उपायः पाणिनीयं व्याकरणम्। सूत्रात्मकः पाणिनेः अष्टाध्यायीग्रन्थः। सूत्रलक्षणनिर्वाहाय प्रत्याहाराः प्रमुखं स्थानं भजन्ते। अतः प्रबन्धेऽस्मिन् माहेश्वरसूत्राणां प्रत्याहारप्रयोजकानि, तेषां श्रुतित्वम्, वर्णोपदेशः, तत्र सक्रमवर्णोपदेशः, प्रत्याहारेष्वितां न ग्रहणम् किमर्थम् इत्यादिविषयाः सुष्ठु उल्लिखिता वर्तन्ते।

**मुख्यशब्दः** –साधुशब्दः, व्याकरणम्, प्रत्याहाराः, सत्यत्वं, ब्रह्मत्वम्, सूत्रात्मकः।

जगत्कारणस्यास्य सत्यत्वं, ब्रह्मत्वम्, आत्मत्वं च **"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्, ब्रह्मैवेदं सर्वम्**[1]**, आत्मैवेदं सर्वम्**[2]**"**इत्यादिभिः श्रुतिभिःप्रतिपाद्यते उपनिषत्सु यथा तथैव शब्दतत्त्वाख्यं ब्रह्म एव जगत्कारणमिति **"ओमिति ब्रह्म**[3]**, वागेवार्थं पश्यति**[4]**, वागेवार्थं ब्रवीति**[5]**, वागेवार्थं निहितं सन्तनोति**[6]**" वाच्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते**[7], इत्यादिभिः श्रुतिभिः प्रतिपाद्यते। तेन सकलजगत्कारणम् उत्पत्तिविनाशरहितं ब्रह्म शब्दतत्त्वमिति विज्ञायते। एतस्य शब्दतत्त्वस्य ब्रह्मणः एव विवर्त्तोऽयं संसार इति हरिणा प्रोक्तम्। तद्यथा –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**

---

1. मुण्डकोपनिषद्-२/२/११
2. छान्दोग्योपनिषद्-७/२५/२
3. तैत्तिरीयोपनिषद्(शिक्षावल्ली-८ अनु)
4. प्रश्नोपनिषद् ४.प्र.उ.म
5. तारसारोपनिषत् २.२
6. तारसारोपनिषत् २.१
7. नृसिंहग्रन्थः-६.२

IJSRST1845595 | Received : 02 March 2018 | Accepted : 25 March 2018 | March-April-2018 [(4)7 | 747-752]

किञ्च अस्य सम्पूर्णस्य जगत: निबन्धनी वाच्यवाचकभावात्मिका वा शक्ति: शब्देष्वेव समाश्रिता। यथोक्तं[8] वाक्यपदीयकारेण –

**शब्देष्वेवाश्रिता शक्तिर्विश्वस्याऽस्य निबन्धनी॥**इति।

संसारेऽस्मिन् तादृशं ज्ञानं न विद्यते यत् शब्दानुगमादृते सम्भवेत्। अत: इयं तु निश्चिति: यत् सर्वेषामपि ज्ञानानां मूलं शब्द एव। तथा चसिद्धान्तोऽयं वैयाकरणानां यत् – **तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते**[9]" इति। एतादृशस्य शब्दब्रह्मण: प्राप्तिस्तु शब्दसंस्कारज्ञानादेव।शब्दसंस्कारे व्याकरणं हेतु:। तेन शब्दसंस्कारज्ञानसम्पादने साधनमपि व्याकरणमिति सामग्रिकसिद्धान्त:। साध्वसाधुशब्दानां विवेकस्तु शब्दसंस्कारानन्तरमेव जायते। शब्दब्रह्मण: सिद्ध्युपाय: अपि तदेव। अत एव भगवता भाष्यकृता भणितम् – **एकश्शब्द: सम्यग्ज्ञात: सुष्ठु प्रयुक्त: स्वर्गे लोके च कामधुग्भवति** इति। तथा च हरिणाऽपि प्रपञ्चितं यत् – **साधुत्वज्ञानविषया सैषा व्याकरणस्मृति:**। साधुशब्दग्रहार्थम् अपभ्रंशनिवारणार्थञ्च सिद्धमिदं शब्दशास्त्रम्। अस्यैव शब्दशास्त्रस्य वेदरक्षकत्वेन अर्थवत्वं प्रतिपादितं भाष्यकारै: "रक्षोहागमलघ्वसन्देहा: प्रयोजनम्" इति।लघुना उपायेन प्रकृतिप्रत्ययविभागपूर्वकं साधुशब्दज्ञानं व्याकरणाध्ययनस्य परमं प्रयोजनमिति सुविदितं वेदितव्यम्। स च उपाय: पाणिनीयं व्याकरणम्। सूत्रात्मक: पाणिने: अष्टाध्यायीग्रन्थ:।

**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।**

**अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदु:॥**

अल्पै: शब्दै: अनल्प: शब्दराशि: व्याकरणाध्येतृभि: प्राप्यते। सूत्रलक्षणनिर्वाहाय प्रत्याहारा: प्रमुखं स्थानं भजन्ते।

**"आदिरन्त्येन सहेता"**(1-1-71) – अन्त्येन इता सहित आदि: मध्यगानां स्वस्य च संज्ञा स्यात् इति तदर्थ:। अनेन सूत्रेण कृता: संज्ञा: प्रत्याहारशब्देन व्यवह्रियन्ते। प्रत्याहारप्रयोजकानि चतुर्दशमाहेश्वरसूत्राणि द्वितीये प्रत्याहाराह्निके विवेचितानि। वर्णानां क्रमसन्निवेश: अनुबन्धसंयोजनं, सूत्रान्तर्गततत्तद्वर्णानां प्रयोजनानि च विशेषरूपेण भाष्ये प्रस्तुतानि।तस्मिन् विषये .यथा

**प्रत्याहारप्रयोजकानि माहेश्वरसूत्राणि**

**येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।**

**कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नम:॥**

---

[8]. वा.प.ब्रह्म-११८

[9]. वा. प. ब्रह्म.-२२

कोऽयं प्रत्याहार:? इति प्रश्ने उच्यते – प्रत्याह्रियन्ते अर्थात् संक्षिप्यन्ते वर्णा: अस्मिन्निति प्रत्याहार:। अत्र तु **आदिरन्त्येन सहेता** इति पाणिनीयं सूत्रं प्रमाणम्। तेन सूत्रेण कृता: संज्ञा: प्रत्याहारशब्देन व्यवह्रियन्ते। ताश्च संज्ञा: अण् अच् हल् इत्यादय:। लघुना उपायेन साधुशब्दज्ञानाय व्याकरणम् अध्येतव्यम्। तदर्थमेव पाणिनिना अष्टाध्यायी विरचिता। प्रत्याहारान् आश्रित्य इयं सम्पूर्णा अष्टाध्यायी प्रवृत्ता। प्रत्याहारप्रयोजकानि अइउण् इत्यादीनि चतुर्दशसूत्राणि। तानि सूत्राणि कानि? इति चेत् उच्यते – अइउण्, ऋलृक, एओङ् ऐऔच् हयवरट् लण् ञमङणनम् झभञ् घढधष् जबगडदश् खफछठथचटतव् कपय् शषसर् हल्।

**चतुर्दशसूत्राणां श्रुतित्वम्**

महेश्वरप्रसादलब्धानि एतानि सूत्राणि, अत एव माहेश्वरसूत्राणीति तेषां व्यवहार:। यत: इमानि सूत्राणि महेश्वरात् आगतानि अत एव तेषां श्रुतिरूपत्वेन चतुर्दशसूत्र्या: अक्षरसमाम्नाय इति व्यवहार:। भाष्यकारै: अयं व्यवहार: कृत:। यथासोऽयमक्षरसमाम्नाय: पुष्पित: फलित: चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशि: इति। एतानि महेश्वरप्रसादलब्धानीत्यत्र किं वचनं प्रमाणमिति संशय उदेति। नन्दिकेश्वरकृतकाशिकायां चतुर्दशसूत्रव्याख्यानसन्दर्भे अइउण् इत्यादीनि महेश्वरप्रसादलब्धानीति स्पष्टमुक्तम्। यथा –

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।**

**उद्धर्तुकाम: सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम्॥**इति।

**श्लोकस्यास्याशयस्तावद्**– परमेश्वरकृतढक्कानादत: ये चतुर्दशध्वनय: त एव चतुर्दशसूत्रत्वेन पाणिनिना प्राप्ता:। अत एव महेश्वरप्रसादप्राप्तत्वात् एतेषां श्रुतित्वेन, अक्षरसमाम्नायत्वेन च व्यवहार:। अत एव भट्टोजिदीक्षितेनोक्तम् – **माहेश्वरसूत्राणि अणादिसंज्ञार्थानि** इति। भर्तृहरिणा उक्तम् – **अस्य अक्षरसमामनायस्य न कश्चित् आधुनिक: कर्ताऽस्ति, एवमेव वेदपारम्पर्येण स्मर्यमाण:** इति। वेदसंबन्धिनी या परम्परा अध्यापकाध्येतार: तै: अध्याप्यमाणत्वात् अधीयमाणत्वाच्चास्यापि वेदत्वमिति तदाशय:। अनेन चतुर्दशसूत्राणामनादित्वमपौरुषेयत्वञ्च सिद्धम्। अत्र कश्चन विशेषो वर्तते। एतेषु सूत्रेषु अन्त्यवर्णान् अर्थात् ण् क् ङ् च् ट् ण् म् ञ् ष् श् व् य् र् ल् इत्येतान् विहाय अन्ये वर्णा: परमेश्वरानुग्रहप्राप्ता:। अन्त्यवर्णा: परमेश्वरेण पाणिनये उपदिष्टा:। उक्तं नन्दिकेश्वरकृतकाशिकायाम् –

**अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम्।**

**धात्वर्थं समुपादिष्टं पाणिन्यादिष्टसिद्धये॥ इति।**

- **वर्णोपदेश: –**

सर्वं नाम धातुजमाहेत्युक्ते: धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थमन्त्यं वर्णचतुर्दशं परमेश्वरेण उपादिष्टम्। अन्त्यवर्णानामनुबन्धत्वेन व्यवहार:। किमर्थं वर्णोपदेश इति प्रश्नस्य समाधानं भाष्यकारैरुक्तम्। यथा – अनुबन्धकरणार्थश्च

वर्णानामुपदेशः इति। केन अनुबन्धाः कृताः इति चेत् येन वर्णाः उपदिष्टाः तेनैवेति व्याख्यातृभिः स्पष्टीकृतम्। ऋक्तन्त्रव्याकरणे शाकटायनेन एवमुक्तम् –

इदमक्षरच्छन्दः वर्णशः समनुक्रान्तं यथा आचार्याः ऊचुः ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः, तं खलु इममक्षरसमाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं प्रब्रूयात् ब्रह्मराशिः इति। अक्षरसमाम्नायस्य ब्रह्मराशित्वेन व्यवहारः कृतः शाकटायनेन। ब्रह्मराशिरित्यस्य ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः।

**अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु।**

**चित्कलामिं समाश्रित्य जगद्रूप उणीश्वरः॥**

अः परमेश्वरः इं मायामाश्रित्य उः व्यापकः सगुणः सन् ण् आसीत्।

- **वर्णानां क्रमसन्निवेशः –**

अत्र वर्णानां क्रमसन्निवेशः सम्पूर्णामष्टाध्यायीं मनसि निधाय कृतः। यथाकथञ्चित् तस्य परिवर्तनं कर्तुं न शक्यते। तद्विषये भाष्यकारः वदति – वृत्तिसमवायार्थः वर्णानामुपदेशः कर्तव्यः इति। समवायो नाम वर्णानां क्रमेण सन्निवेशः। अणादिप्रत्याहारेण शास्त्रप्रवृत्तिः वर्णानां क्रमेण सन्निवेशस्य फलम्। पश्यन्तु – अच्प्रत्याहारान्तर्गताः कतिचन वर्णाः वर्णसमाम्नाये अ इ उ ऋ ऌ इति क्रमेण सन्निविष्टाः एओङ् ऐऔच् इत्यत्र तु क्रमः विपर्यस्तः। हल्प्रत्याहारे यवरलवर्णान् विहाय अन्ये सर्वे हलः लौकिकक्रमाद् भिन्नाः। किमत्र कारणम्? का वा युक्तिरिति शङ्का जायते। रक्षादिषु व्याकरणाध्ययनप्रयोजनेषु लाघवमेकं प्रयोजनम्। लघुनोपायेन सर्वे शब्दाः ज्ञातव्याः। तदर्थमेव शास्त्रं प्रवृत्तम्।

वेदात् नः वैदिकाः शब्दाः सिद्धाः लोकाच्च लौकिकाः। अतः अनर्थकमिदं व्याकरणमिति वदन्तः ये विप्रतिपन्नबुद्धयः तेभ्यः अध्येतृभ्यः सुहृद्भूत्वा आचार्यः इदं शास्त्रम् अन्वाचष्टे इत्युक्तं भाष्यकृता। तच्च शास्त्रं पाणिनेः सूत्रात्मकः अष्टाध्यायीग्रन्थः। सूत्रञ्च बह्वर्थप्रतिपादकं संग्रहेण भाव्यम्।सूत्र इति धातुतः अच्प्रत्ययेन निष्पन्नोऽयं सूत्रम् इति शब्दः। सः नपुंसकलिङ्गी भवति। सूत्राणि नरि तन्तवः इति अमरकोशात् यद्यपि लोके सूत्रम् इति पदेन तन्तुः गुणः इत्यर्थाः स्वीक्रियन्ते तथापि व्याकरणशास्त्रे **अल्पाक्षरत्वयुक्तमसन्दिग्धं सारगर्भमर्थगौरवयुक्तं वृत्तिगतिकमुच्चारणादिसौकर्येण नितान्तं सुबद्धयुक्तं शास्त्रं सूत्रम्** इति व्यवहारो भवति। सूत्रलक्षणं यथा –

**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।**

**अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥इति।**

इदं लक्षणं पाणिनीयसूत्रेषु परिपूर्णतया घटते। सूत्रस्याल्पाक्षरत्वे प्रत्याहारः मुख्यं स्थानं भजते। तदनन्तरमनुवृत्त्यादिकम्।

यथा **इको यणचि (6.1.77)**इति सूत्रम्। तत्र इकः यण् अचि इति पदत्रयं वर्तते। त्रयः अपि प्रत्याहाराः। पाणिनिना **आदिरन्त्येन सहेता** इति सूत्रेण प्रत्याहारसंज्ञा उक्ता। यदि प्रत्याहारसंज्ञा न स्यात् तर्हि तस्य स्थाने इक्पदेन चत्वारः, यण्पदेन चत्वारः, अच्पदेन नव, आहत्य सप्तदशवर्णाः प्रयोक्तव्याः स्युः। अष्टाध्याय्यां मिलित्वा 3978 सूत्राणि सन्ति। प्रत्याहाराभावे कियत्परिमाणकः अष्टाध्यायीग्रन्थः स्यात्। महत्परिमाणके ग्रन्थे पठितृणां दुर्लभस्स्यात्। अत एव प्रत्याहाराः पाणिनीये महत्त्वपूर्णं स्थानं भजन्ते। येन क्रमेण वर्णः सन्निवेशः प्रत्याहारद्वारा लक्षसम्पादकशास्त्रनिर्वाहकः भवति तादृशानुपूर्वीविशिष्टः वर्णसमाम्नायः परमेश्वरानुग्रहात् पाणिनिना प्राप्तः। तत्रत्यः आनुपूर्वीसन्निवेशः **यथासंख्यमनुदेशः समानाम्** इत्यादिशास्त्रनिर्वाहकः भवति। समसंख्यकं कार्यं यथासंख्यं प्रवर्तते। यथा इको यणचीति इकः स्थाने यण् विधीयते। इकः चत्वारः, यणोऽपि आदेशाः चत्वारः। स्थानिनामादेशानाञ्च समसंख्यकत्वेन यथासंख्यं कार्यप्रवृत्त्या इकारस्यैव यकारादेशः। न त्वन्येषाम्। यदि वर्णानुपूर्व्यां व्युत्क्रमः स्यात् तर्हि प्रक्रियाव्यवस्था सर्वा अपि भज्येत। अतः माहेश्वरसूत्रेषु वर्णानुपूर्व्याः महत् प्राधान्यं वर्तते। इत्थं वर्णसमाम्नायस्य प्रत्याहारद्वारा लाघवेन शास्त्रप्रवृत्तिः परमं प्रयोजनमिति सिद्धम्।

- **प्रत्याहारेषु अनुबन्धानां न ग्रहणम्** -

**हलन्त्यम् (1-3-3)**इति सूत्रस्य अर्थस्तावद् उपदेशेऽन्त्यं हलित्स्यात्।**उपदेशेऽजनुनासिक इत् (1-3-2)**इत्यस्य उपदेशे अनुनासिकोऽजित्संज्ञः स्यात् इति।उपदेशः नाम किम्? "उपदेशः आद्योच्चारणम्"। अर्थात् आदिऋषिभिः (पाणिनि-कात्यायन-पतञ्जलिभिः) यस्य उच्चारणं कृतं सः उपदेशः। तेन च प्रत्याहाराणाम्, प्रत्ययानाम्, आदेशानाम्, आगमानाम्, धातूनाम्, प्रातिपदिकानाम्, निपातानाम् - इत्यादीनां ग्रहणं भवति। एतत् सर्वम् उच्चारणं धातुपाठे, सूत्रपाठे, गणपाठे, उणादिपाठे, लिङ्गानुशासने च कृतम् अस्ति। अतः एते सर्वे ग्रन्थाः, तेषु उच्चारिताः प्रत्याहार-प्रत्यय-आदेश-आगम-धातवश्च ऋषिभिः यस्याम् अवस्थायाम् मूलरूपेण उच्चारिताः, तस्याम् स्थितौ उपदेशसंज्ञकाः भवन्ति ।

चतुर्दशसु सूत्रेषु अन्त्यवर्णाः सर्वेऽपि हलः अनुबन्धाः परमेश्वरेण पाणिनये उपदिष्टाः। अतः ते अनुबन्धाः अपि उपदेशत्वेन गृह्यन्ते। ततश्च उपदेशे अन्त्यहलाम् इत्स्यात् इत्यर्थकेन**हलन्त्यम्** इतिसूत्रेण माहेश्वरसूत्रेषु अन्त्यवर्णानामित्संज्ञा भवति। तदन्तरम् इत्संज्ञकवर्णैः **आदिरन्त्येन सहेता** इति सूत्रेण अणादयः प्रत्याहाराः निष्पद्यन्ते। प्रत्याहारग्रहणे अन्तिम-इत् वर्णस्य ग्रहणं न क्रियते । तथा च, मध्ये विद्यमानानाम् इत्-वर्णानाम् अपि ग्रहणं न भवति । यदि एवं इत्-वर्णानाम् ग्रहणम् अभविष्यत्, तर्हि "अच्" इत्यनेन "ऋऌक्" इत्यस्य ककारस्य अपि ग्रहणम् अभविष्यत् । एवम् अभविष्यत् चेत् "अच्" प्रत्याहारे ककारस्य अपि समावेशः अभविष्यत् । अनेन "इ + क्" इत्यत्र , तथा च "उ + क्" इत्यत्रापि **इको यणचि (6।1।77)** इत्यनेन यण्-सन्धिः अपि अभविष्यत्। प्रत्याहारेषु अन्त्यवर्णानाम् अनुबन्धानां ग्रहणं कुतो न भवतीति शङ्का **आचारात् अप्रधानत्वात् लोपश्च बलवत्तरः** इति त्रिभिः हेतुभिः भाष्यकारैः समाहिता। आचारो पाणिनेः सौत्रव्यवहारः। एकमुदाहरणम् - **मुखनासिकावचनोऽनुनासिकः (1-1-8)**

इति सूत्रे अनुनासिक इति निर्देशः कृतः। अनुबन्धानां प्रत्याहारेषु यदि ग्रहणं स्यात्तर्हि ककारादीनाम् अच्प्रत्याहारान्तर्गततया तेषामपि अच्त्वात् अनुनासिक इत्यत्र इकारस्य ककारात्मकाच्परत्वेन इको यणचि इति सूत्रेण यणादेशः कर्तव्यः आसीत्। तेन अनुनास्कः इति स्याद्। तदकरणेन ज्ञायते अनुबन्धानां प्रत्याहारेषु ग्रहणं न भवतीति। तथा च शिक्षा", "मुक्ति" एतादृशेषु शब्देषु संहितायाम् सत्याम् अपि सन्धिः न भवति । अतः एते शब्दाः एव अस्य प्रमाणानि सन्ति, यत् प्रत्याहारग्रहणे इत्-वर्णानाम् ग्रहणम् न भवति ।

इत्थं माहेश्वरसूत्राणां प्रत्याहारप्रयोजकानि, तेषां श्रुतित्वम्, वर्णोपदेशः, तत्र सक्रमवर्णोपदेशः, प्रत्याहारेष्वितां न ग्रहणम् इत्यादिविषयाः अत्र अस्यां लेखायां सुष्ठु उल्लिखिता वर्तन्ते।

**परिशीलितग्रन्थसूची**


1. पाणिनीय अष्टाध्यायीसूत्रपाठः सम्पा2012 - कृष्णदास अकादेमी वारणसी ,पं सत्यनारायणशास्त्री खण्डुडी.
2. लघुशब्देन्दुशेखर:2014-वाराणसी-चौखाम्वा विद्याभवन ,हरिनारायण तिवारी.सम्पा-
3. वाक्यपदीयम्(ब्रह्मकाण्डम्), भर्तृहरिः, चौखम्बा विद्याभवन, वाराणसी, 2006
4. वैयाकरणसिद्धान्तकौमुदीतत्त्वबोधिनीसहिता-, चौखम्बा विद्याभवन, वाराणसी, 2006
5. अष्टाध्यायीसहजबोधः-, पुष्पा दीक्षित, पाणिनीयशोधसंस्थान, छत्तीसगढ, 2004
6. वैयाकरणसिद्धान्तकौमुदी, (संश्रीगिरिधरशर्मा.म.म(, मोतीलाल बनारसीदास, देहली, 1997
7. लघुशब्देन्दुशेखरः, नागेशभट्टः, चौखम्बासंस्कृतप्रतिष्ठानदिल्ली -, 2001
8. ईशाद्यष्टोत्तरशतोपनिषदः,(सं) श्रीवासुदेवशर्मा, चौखम्बा-विद्याभवनम्, दिल्ली,1995